कस्तयोर्निवारकः स्यात् । किञ्चान्यत् द्वाभ्यामणुभ्यां निरवयवाभ्यां सावयवस्य द्व्यणुकस्याकाशेनेव संश्लेषानुपपत्तिः नह्याकाशस्य पृथिव्यादीनाञ्च जतुकाष्ठवत् संश्लेषोऽस्ति । कार्य्यकारणद्रव्ययोराश्रिताश्रयभावोऽन्यथा नोपपद्यते इत्यवश्यकल्प्यः समवायइति चेन्न इतरेतराश्रयत्वात् । कार्य्यकारणयोर्हि भेदसिद्धावाश्रिताश्रयभावसिद्धिराश्रिताश्रयभावसिद्धौ च तयोर्भेदसिद्धिः कुण्डवदरवदितरेतराश्रयता स्यात् । न हि कार्य्यकारणयोर्भेदः आश्रिताश्रयभावो वा वेदान्तवादिभिरभ्युपगम्यते कारणस्यैव संस्थानमात्रं कार्य्यमित्यभ्युपगमात् । किञ्चान्यत् परमाणूनां परिच्छिन्नत्वात् यावत्योदिशः षडष्टौ दश वा तावद्भिरवयवैः सावयवास्ते स्युः सावयवत्वादनित्याश्चेति नित्यत्वनिरवयवत्वाभ्युपगमो बाध्येत । यांस्त्वं दिग्भेदभेदिनोऽवयवान् कल्पयसि तएव मम परमाणव इति चेन्न स्थूलसूक्ष्मतारतम्यक्रमेण परप्रकारत्वेन नाशोपपत्तेः। यथा पृथिवी द्व्यणुकाद्यपेक्षया स्थूलतमा वस्तुभूतापि विनश्यति ततःसूक्ष्मं सूक्ष्मतरञ्च पृथिव्येकजातीयकं विनश्यति ततोद्व्यणुकं तथा परमाणवोऽपि पृथिव्येकजातीयकत्वाद्विनश्येयुः । विनश्यन्तोऽवयवविभागेनैव विनश्यन्तीतिचेन्नायं दोषः यतोघृतकाठिन्यविलयनवदपि विनाशोपपत्तिमवोचाम । यथाहि घृतसुवर्णादीनामविभज्यमानावयवानामप्यग्निसंयोगात् द्रवभावापत्त्या काठिन्यविनाशोभवति एवं परमाणूनामपि परमकारणभावापत्त्या विनाशोभविष्यति । तथा कार्य्यारम्भोऽपि नावयवसंयोगेनैव केवलेन भवति क्षीरजलादीनामन्तरेणाप्यवयवसंयोगान्तरं दधिहिमादिकार्य्यारम्भदर्शनात्" । इ० उ० भा० सत्कार्य्यव्यवस्थापनोद्देशे 'द्विनिष्ठत्वात् सम्बन्धस्यायुतसिद्धानामदोष इति चेत् न । भावाभावयोरयुतसिद्धत्वानुपपत्तेः । भावभूतयोर्हि युतसिद्धताऽयुतसिद्धता वा स्यान्न तु भावाभावयोर्वा तस्मात् सदेव कार्य्यं प्रागुत्पत्तेरिति सिद्धम्" । "युतसिद्धयोरज्जुघटयोर्मिथःसंयोगे पृथक्सिद्धिरिष्यते अयुतसिद्धानां परस्परपरिहारेण प्रतीत्यनर्हाणां कार्य्यकारणादीनां मिथोयोगेऽपृथक्सिद्धभावो न दोषमावहतीति शङ्कते अयुतेति" आनन्दगिरिः । 'द्रव्याश्रयेष्वपि गुणेषु" मा०५,२८, वाख्यायां मल्लिनाथः द्रव्याश्रयेष्वपि अयुतसिद्धत्वात् द्रव्यसमवेतत्वाच्च द्रव्याधीनसत्ताकेषु सत्स्वपीति ।

**अयुतसिद्धि** स्त्री यु-अमिश्रणे क्त युतः पृथग्रूपेण स्थितः तथाभूतयोः सिद्धिः अभावे न०त० । पृथग्भावेनासिद्धौ । यथा अवयवावयविनोः, द्रव्यगुणयोः, द्रव्यक्रिययोस्तयासिद्धिः ते हि स्वस्वकारणे अपृथग्भूततया सिद्धाः । अतएवोक्तं "युतसिद्ध्यभावात् कार्य्यकारणयोः संयोगविभागौ न विद्येते" वै०सू० । "ससम्बन्धयोर्विद्यमानत्वम् पृथगाश्रयाश्रयित्वं वा युतसिद्धिस्तदभावस्त्ववयवावयविनोः" इति उप०वृत्तिः । अयमाशयः 'घटपटादयो हि पृथग्भूततया सिद्धाः आश्रयाश्रयिभावं लभन्ते । कार्य्यकारणयोस्तु न पृथक्स्थितिर्येन तथा स्यात्' इति ।

**अयुताजित्** पु० अयुतं जितवान् जि—भूते क्विप् दीर्घः उ०प०स० । यदुवंश्ये नृपभेदे । "अयुताजित् सहस्राजित् शताजिच्च दासकः उपवाहृकङ्कुर्यां भजमानाद्विजज्ञिरे" हरि०प० । [त्रि० ।

**अयुद्ध** न० अभावे न०त० । १युद्धाभावे न०ब० । २युद्धशून्ये

**अयुव** त्रि० न यौति यु—बा०क० । असंसृष्टे "अयुवमार्य्यस्य राष्ट्रं भवति" ऐत०ब्रा० ।

**अयुवन्** पु०स्त्री०न युवा विरोधे न०त० । वृद्धे—स्त्रियां ङीप् ।

**अयूप्य** त्रि० यूपे साधु यत् न०त० । यूपासाधने निम्बजम्बीरादौ वृक्षे "वृक्षा द्विविधा यूप्या अयूप्याश्च पलाशखदिरबिल्वादयो यूप्या निम्बजम्बीरादयस्त्वयूप्याः" यजु०वेद०दी० ।

**अये** अव्य० इण्—एच् । १कोपे, २विषादे, ३संभ्रमे, ४स्मृतौ, ५अवबुद्धौ च । "अये दक्षिणेन पुष्पवाटिकामालाप इव श्रूयते" शकु० 'अये गौरीनाथ ! त्रिपुरहर ! शम्भो ! त्रिनयन" ! सां०द० ।

**अयोग** पु० युज्—घञ् अभावे न०त० । १योगाभावे, अप्राशस्त्ये न०त० । ज्योतिषोक्ते तिथिवारादीनां दुष्टे २योगे "अयोगः सिद्धियोगश्च द्वावेतौ भवतोयदि । अयोगोहन्यते तत्र सिद्धियोगः प्रवर्त्तते" इति राजमा० । "अयोगे सुयोगोऽपि चेत् स्यात्तदानीमयोगं निहत्यैव सिद्धिं तनोति । परे लग्नशुद्ध्या कुयोगादिनाशं दिनार्द्धोत्तरं विष्टि-पूर्व्वञ्च शस्तम्" "यत्र लग्नं विना किञ्चित् क्रियते शुभसंज्ञकम् तत्र तेषामयोगानां प्रभावाज्जायते फलम्" इति च मुहू० चि० । न०ब० । ३विधुरे, ४कूटे, ५कठिनोद्यमे सुश्रुतोक्ते वमनापशमनीये ६रोगभेदे च । "यत्राध्मानं हृदयग्रहस्तृष्णा मूर्च्छा दाहश्च भवति तमयोगमित्याचक्षते तमाशु वमयेदिति" । "अयोगाद्यांस्तु वक्ष्यामि व्यापदः सचिकित्सिताः । अत्युष्णोऽल्पौषधो हीनो वस्तिर्नैति प्रयोजितः विष्टम्भाध्मानशूलैश्च तमयोगं प्रचक्षते" इति च सुश्रुतः ।